समायुक्तेऽधौतेऽपाने शिशोर्भवेत्। स्विन्नस्यास्नाप्यमानस्य कण्डूरक्तकफोद्भवा। कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते। एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्" इति तस्य लक्षणाद्युक्तम्। अस्य स्त्रीत्वमपि॥ "धात्र्याः स्तन्यं शोधयित्वा बाले साध्याहिपूतना"। "पटोलपत्रत्रिफला-रसाञ्जनविपाचितम्। पीतं घृतं नाशयति कृच्छ्रामप्यहिपूतनाम्" "चिकित्सन् मुष्ककच्छूञ्चाप्यहिपूतनपानवत्" सुश्रु०।

**अहिफेन** पु० अहेः फेनः गरलमिव तीक्ष्णगुणत्वात्। (आफिङ्) इति ख्याते १वृक्षनिर्यासभेदे। ६त० २सर्पलालायाञ्च।

**अहि(बु)बुध्न** पु० अहेरिव बुध्नो ग्रीवा यस्य। १रुद्रभेदे, २तद्देवताके २उत्तरभाद्रपदनक्षत्रे ३मुहूर्त्तभेदे च। पृ० अहिर्बु(र्वु)ध्न्योऽहि(र्बु)र्बुध्न्योऽप्यत्र। तत्स्वरूपं ध्यानशब्दे वक्ष्यते। "अजैकपादहिर्बुध्नः विरूपाक्षश्च रैवतः" विष्णुध०। मुहूर्त्तभेदश्च अहःशब्दे ५७६ पृष्ठे उक्तः तन्नक्षत्रस्य तद्देवताकत्वञ्च अश्लेषाशब्दे ४६८ पृष्ठे उक्तम्।

**अहिभय** न० अहेः, गूढस्थत्वात् आहताकारत्वाच्च अहितुल्यात् स्वपक्षात् भयम्। राज्ञां स्वपक्षजनिते १भये ६त०। २सर्पभये च। [भयनाशिकायाम् भूम्यामलक्याम्।

**अहिभयदा** स्त्री अहिभयं द्यति खण्डयति दो-क। सर्पे

**अहिभानु** पु० अहिर्व्याप्यो भानुस्तद्गतिरस्य। सूर्य्यगतिहेतौ वायौ प्रवाहानिलेनैव सूर्य्यगतेर्ज्योतिषोक्तेस्तथात्वम्। "मरुतो अहिभानवः" ऋ० १,१७२,१।

**अहिभुज्** पु० अहिं भुङ्क्ते क्विप्। १गरुडे, २मयूरे, ३नकुले च

**अहिभृत्** पु० अहिमाभूषणतया बिभर्त्ति भृ-क्विप्। १शिवे

**अहिम** न० विरोधे न०त०। १उष्णस्पर्शे २तद्वति त्रि०।

**अहिमद्युति** पु० अहिमा उष्णा द्युतिरस्य। १सूर्य्ये २अर्कवृक्षे च अहिमकरादयोऽप्यत्र।

**अहिमन्यु** त्रि० अहिरिव हिंस्रोमन्युरस्य। १हननशीले २अहितुल्यहिंस्रक्रोधे च "शवसाऽहिमन्यवः" ऋ० १,६४,८। ६त०। ३सर्पक्रोधे च। [कुलीनामलतायाम्।

**अहिमर्द्दनी** स्त्री अहिर्मर्द्द्यतेऽनया मृद-ल्युट्। गन्धना-

**अहिमाय** त्रि० अहेरिव कुटिला मायाऽस्य। वृत्रासुरादौ "बृहस्पतेरहिमायान् अभि द्यून्" ऋ० १,१९०,४।

**अहिमार** पु० अहिं मारयति मृ-णिच्-अण्। १अरिमेदकवृक्षे सर्पमारके २गरुडे ३मयूरे ४वृत्रासुरनाशके इन्द्रे च। [अरिमेदवृक्षे।

**अहिमेद(क)** पु० अहिराहन्ताऽरिरिव मेदोऽस्य वा कप्।

**अहिरिपु** पु० ६त०। १गरुडे २मयूरे ३नकुले ४कृष्णे च ५वृत्रशत्रौ इन्द्रे च। अहिजिच्छब्दे विवृतिः।

**अहिलता** स्त्री अहिलोकस्य पातालस्य लता शाक०त० अहिरिव लता वा दीर्घाकारत्वात्। १ताम्बूल्याम् २अहिद्वेष्ट्री लता शा०त०। २गन्धनाकुल्याम्।

**अहिविद्विष्** पु० ६त०। १गरुडे २मयूरे ३नकुले ४कृष्णे ५गन्धनाकुलीवृक्षे वृत्रशत्रौ ६इन्द्रे च "द्रुतं धनुःखण्डमिवाहिविद्विषः" किरा०। क। अहिविद्विषोऽप्यत्र।

**अहिशुष्म** त्रि० अह-व्याप्तौ इन् अहि व्यापि शुष्मं यस्य व्यापकबले। "आस्राङ्गमयादहिशुष्म!" ऋ०५,३२,५।

**अहिसक्थ** त्रि० अहिरिव दीर्घं सक्थि यस्य। १सर्पतुल्यदीर्घसक्थियुक्ते उपचारात् २तदाधारदेशे पु०। तद्देशस्यादूरभवम् सुवास्वा० अण्। आहिसक्थः। तद्देशादूरभवे देशादौ त्रि०।

**अहिहत्य** न० हत्या हननं भावे क्यप् वेदे न०। १वृत्रासुरहनने "अर्कमहिहत्ये ऊचुः" ऋ० १,१६१,। लोके स्त्रीत्वम्। २सर्पहनने स्त्री। [२इन्द्रे च।

**अहिहन्** पु० अहिं सर्पं वृत्रासुरं वा हतवान् क्विप्। १गरुडे

**अहीन** पु० अहोभिः साध्यते ख। अहःसमूहसाध्ये द्विरात्रादियागभेदे। स च ताण्ड्य०ब्रा० भाष्ये षोडश ऋत्विज उपक्रम्य "एतेऽहीनैकाहैर्याजयन्ति" आपस्त०उक्तः "तएते होत्रादिनामका षोडशर्त्विजोद्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति" भा० "अहीनयजनमशुचिकरमिति" स्मृतिः "अभिचारमहीनञ्च त्रिः कृत्वेह विशुध्यति" मनुः। अहीनामिनःस्वामी। २सर्पराजे वासुकौ पु०। न हीनः। ३अन्यूने त्रि० न न महीन महीन पराक्रमम् रघुः "वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु" मनुः "त्वत्तः स्रुतमहीनकीर्त्तेः" भा०आ०प०।

**अहीनगु** पु० सूर्य्यवंश्ये नृपभेदे "अहीनगुर्नाम स गां समग्रामहीनबाहुद्रविणः शशास" रघुः "रामस्य तनयोजज्ञे कुश इत्यभिविश्रुतः। अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः। निषधस्य नलः पुत्त्रोनभः पुत्रोनलस्य तु। नभस्य पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः। क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान्। आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः। अहीनगोस्तु दायादः सुधन्वा नाम पार्थिवः"। हरि०व०१६अ०।

**अहीनवादिन्** त्रि० न हीनः वादी। "अन्यवादी क्रियाद्वेषी नोस्थापता निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" इति स्मृत्युक्तहीनभिन्ने वादिनि।